दिनाङ्क :- 09.08.2025

प्रात: - 06:55

## मन्त्रिमण्डलम्

सर्वकारेण वर्तमानवित्तवर्षाय प्रधानमन्त्री उज्ज्वला योजना उपभोक्तृभ्यः अनुदानस्य अनुवर्तनं स्वीकृतम्। अस्मिन् अनुमानितव्ययः द्वादशसहस्रकोटिरूप्यकाणां भविष्यति। ह्यः नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आध्यक्ष्ये मन्त्रिमण्डलस्य निर्णयनां विषये सूचयन्, सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् अस्याः योजनायाः अन्तर्गतं त्रयस्त्रिंशल्लक्षाधिक दश कोटिपरिवाराः लाभान्विताः सञ्जाताः।

मंत्रिणा उक्तं सार्वजनिकक्षेत्रस्य तैलविपणन-संस्थानां कृते त्रिंशत्सहस्रकोटिरूप्यकाणां क्षतिपूर्तिः अपि सर्वकारेण अनुमोदितास्ति। श्री वैष्णवः एतदपि सूचितवान् यत् सर्वकारेण बहु-विषयक-शिक्षायाः तथा च प्राविधिक-शिक्षा-योजनायां संशोधन-विकासाय च द्विशताधिकचतुस्सहस्र कोटि-रूप्यकाणां व्ययस्य आय-व्यायिक-साहाय्याय अनुमतिः प्रदत्ता अस्ति इति। सः अवदत् यत्, अस्याः योजनायाः उद्देश्यं प्राविधिकशिक्षायाः गुणवत्तायाः, समानतायाः, प्रशासनस्य च औन्नत्यं वर्तते। सर्वकारेण असम-त्रिपुरा-राज्ययोः कृते विद्यमानस्य केन्द्रीय-क्षेत्रस्य विशेष-विकास-कोषस्य अन्तर्गतं चतुर्णां नूतनानां घटकानाम् अपि अनुमोदना कृता, यस्य आहत्य व्ययः सार्धद्विशताधिकचतुस्सहस्ररूप्यकाणि भविष्यति

## पी. एम्.-पुटिन्-

प्रधानमन्त्री नरेन्द्रमोदी रूसदेशस्य राष्ट्रपतिना व्लादिमिर् पुटिन् इत्यनेन सह विस्तृतं वार्तालापम् अकरोत्। श्री पुटिनेन युक्रेन्-देशस्य विषये नवीनतमानां घटनाक्रमाणां विषये अवधानं प्रदत्तम्। राष्ट्रपतेः पुटिनस्य विस्तृतमूल्यांकनाय धन्यवादं प्रददता प्रधानमन्त्रिणा संघर्षस्य शान्तियुतसमाधानाय भारतस्य स्थिरस्थितिम् पुनरुक्तम्।

उभौ नेतारौ द्वैपाक्षिक-कार्यसूच्याः प्रगतिः अपि समीक्षितवन्तौ, तथा च भारत-रूस-विशिष्ट-विशेषाधिकारयुक्त-सामरिकसहभागित्वं इतोऽपि सुदृढं कर्तुं स्वप्रतिबद्धता पुनः प्रकटितवन्तौ।

<u>रेलवे-कीर्तिमतम्</u>

एशियायाः बृहत्तमस्य, पञ्च दशमलवाधिक चत्वारि कि.मी.परिमितस्य दीर्घस्य वस्तुवाहक रेलयानस्य 'रुद्रास्त्र' इत्यस्य भारतीयरेल विभागेन परीक्षणं सफलतया कृत्वा नूतनं किर्तिमतं विरचितम्। उत्तरप्रदेशस्य चन्दौलीनगरस्य गंजख्वाजा-रेलस्थानकात् झारखण्डस्य गढ़वापर्यन्तं नवोत्तरद्विशत कि.मी. परिमित सुदीर्घयात्रा दश निमेषाधिक पञ्च होरासु पूरितम्।

<u>दिल्ली-विद्यालयशुल्कः-</u>

दिल्ली-विधानसभया पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य विद्यालय-शुल्क-विनियमन-विधेयकं पारितं, यस्मिन् शुल्कवृद्धि-सम्बद्ध-निर्णयेषु अभिभावकेभ्यः वीटो इति शक्तिं प्रददाति, येन सुनिश्चितं भवति यत् विद्यालयप्रबन्धनानि एकाधिकारेण शुल्कवृद्धिं न आरोपयितुं शक्नुवन्ति। दिल्ल्याः शिक्षामन्त्री आशीषसूदः, विधानसभायाम् अवदत् यत्, यदि एकोपि अभिभावकः असहमतः भवति तर्हि शुल्कवृद्धेः प्रस्तावः स्वीकृतः न भविष्यति।

<u>रक्षाबन्धनम्</u>

अद्य भ्रातृ-भगिन्योः स्नेह-द्योतकं रक्षाबन्धन-पर्व अशेष-देशे सोल्लासं समायोज्यते। अवसरेऽस्मिन् भ्रातृणां सुख-समृद्धि-सुरक्षा-शंसिन्यो भगिन्यस्तेषां करमूले चित्र-विचित्रं रक्षा-सूत्रमुपबध्नन्ति, भ्रातरश्च ताभ्यो रक्षा-संकल्प-पुरस्सरं विविधान् प्रियोपहारान् प्रतियच्छन्ति । राष्ट्रपतिः द्रौपदी मुर्मू वर्या देशवासिभ्यः रक्षा बंधन पर्वणः शुभ कामनाः प्रायच्छत्। सुश्रीः मुर्मू वर्या स्वीये सन्देशे उक्तवती, रक्षा बंधन पर्व भ्रातृभ्यः भगिनीनां प्रेम्णः स्नेहस्य च अभिव्यक्तिः अस्ति ।

## रक्तवृन्तकम्

**सर्वकारेण उक्तं यत् सम्पूर्णे देशे रक्तवृन्तकस्य मूल्येषु वृद्धिः मूलभूत-याचना-आपूर्ति-असंतुलनस्य अथवा उत्पादन-न्यूनतायाः कारणैः न वर्तते अपितु अस्थायि-स्थानीय-कारकाणां कारणात् इयं वृद्धिः सञ्जाता अस्ति। उपभोक्तृकार्य-खाद्य-सार्वजनिक-वितरण-मन्त्रालयेन सूचितं यत् जुलाई-मासस्य अन्तिम-सप्ताहाभ्यन्तरे देशस्य उत्तर-वायव्य-प्रदेशेषु प्रचण्डवृष्ट्या दिल्लीनगरे रक्तवृन्तकेत्यस्य मूल्यं त्रिसप्ततिः रूप्यकाणि यावत् प्रति किलोग्रामपरिमितं वर्धितम् इति।**

## एशियाई मुष्टामुष्टि अण्डर-१९

**अण्डर-19 एशियाई मुष्टामुष्टि-प्रतियोगितायाम् अद्य स्वस्व-उपान्त्यचक्रीय-क्रीडासु विजित्य सप्तमहिलाः समेत्य दशभारतीयाः मुष्टामुष्टि-क्रीडकाः बैंकॉक्-नगरे स्वर्णपरकाय स्पर्धां करिष्यन्ति।**